# ॥ वाल्मीकि रामायण ॥

## ४ किष्किन्धाकाण्ड

### अध्याय ११

रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनम् ।
सुग्रीवः पूजयां चक्रे राघवं प्रशशंस च ॥ १॥

असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः ।
त्वं दहेः कुपितो लोकान्युगान्त इव भास्करः ॥ २॥

वालिनः पौरुषं यत्तद्यच्च वीर्यं धृतिश्च या ।
तन्ममैकमनाः श्रुत्वा विधत्स्व यदनन्तरम् ॥ ३॥

समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरम् ।
क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः ॥ ४॥

अग्राण्यारुह्य शैलानां शिखराणि महान्त्यपि ।
ऊर्ध्वमुत्क्षिप्य तरसा प्रतिगृह्णाति वीर्यवान् ॥ ५॥

बहवः सारवन्तश्च वनेषु विविधा द्रुमाः ।
वालिना तरसा भग्ना बलं प्रथयतात्मनः ॥ ६॥

महिषो दुन्दुभिर्नाम कैलासशिखरप्रभः ।
बलं नागसहस्रस्य धारयामास वीर्यवान् ॥ ७॥

वीर्योत्सेकेन दुष्टात्मा वरदानाच्च मोहितः ।
जगाम स महाकायः समुद्रं सरितां पतिम् ॥ ८॥

ऊर्मिमन्तमतिक्रम्य सागरं रत्नसञ्चयम् ।
मम युद्धं प्रयच्छेति तमुवाच महार्णवम् ॥ ९॥

ततः समुद्रो धर्मात्मा समुत्थाय महाबलः ।
अब्रवीद्वचनं राजन्नसुरं कालचोदितम् ॥ १०॥

समर्थो नास्मि ते दातुं युद्धं युद्धविशारद ।
श्रूयतामभिधास्यामि यस्ते युद्धं प्रदास्यति ॥ ११॥

शैलराजो महारण्ये तपस्विशरणं परम् ।
शङ्करश्वशुरो नाम्ना हिमवानिति विश्रुतः ॥ १२॥

गुहा प्रस्रवणोपेतो बहुकन्दरनिर्झरः ।
स समर्थस्तव प्रीतिमतुलां कर्तुमाहवे ॥ १३॥

तं भीतमिति विज्ञाय समुद्रमसुरोत्तमः ।
हिमवद्वनमागच्छच्छरश्चापादिव च्युतः ॥ १४॥

ततस्तस्य गिरेः श्वेता गजेन्द्रविपुलाः शिलाः ।
चिक्षेप बहुधा भूमौ दुन्दुभिर्विननाद च ॥ १५॥

ततः श्वेताम्बुदाकारः सौम्यः प्रीतिकराकृतिः ।
हिमवानब्रवीद्वाक्यं स्व एव शिखरे स्थितः ॥ १६॥

क्लेष्टुमर्हसि मां न त्वं दुन्दुभे धर्मवत्सल ।
रणकर्मस्वकुशलस्तपस्विशरणं ह्यहम् ॥ १७॥

तस्य तद्वचनं श्रुत्वा गिरिराजस्य धीमतः ।
उवाच दुन्दुभिर्वाक्यं क्रोधात्संरक्तलोचनः ॥ १८॥

यदि युद्धेऽसमर्थस्त्वं मद्भयाद्वा निरुद्यमः ।
तमाचक्ष्व प्रदद्यान्मे योऽद्य युद्धं युयुत्सतः ॥ १९॥

हिमवानब्रवीद्वाक्यं श्रुत्वा वाक्यविशारदः ।
अनुक्तपूर्वं धर्मात्मा क्रोधात्तमसुरोत्तमम् ॥ २०॥

वाली नाम महाप्राज्ञः शक्रतुल्यपराक्रमः ।
अध्यास्ते वानरः श्रीमान्किष्किन्धामतुलप्रभाम् ॥ २१॥

स समर्थो महाप्राज्ञस्तव युद्धविशारदः ।
द्वन्द्वयुद्धं महद्दातुं नमुचेरिव वासवः ॥ २२॥

तं शीघ्रमभिगच्छ त्वं यदि युद्धमिहेच्छसि ।
स हि दुर्धर्षणो नित्यं शूरः समरकर्मणि ॥ २३॥

श्रुत्वा हिमवतो वाक्यं क्रोधाविष्टः स दुन्दुभिः ।
जगाम तां पुरीं तस्य किष्किन्धां वालिनस्तदा ॥ २४॥

धारयन्माहिषं रूपं तीक्ष्णशृङ्गो भयावहः ।
प्रावृषीव महामेघस्तोयपूर्णो नभस्तले ॥ २५॥

ततस्तु द्वारमागम्य किष्किन्धाया महाबलः ।

ननर्द कम्पयन्भूमिं दुन्दुभिर्दुन्दुभिर्यथा ॥ २६॥

समीपजान्द्रुमान्भञ्जन्वसुधां दारयन्खुरैः ।
विषाणेनोल्लेखन्दर्पात्तद्द्वारं द्विरदो यथा ॥ २७॥

अन्तःपुरगतो वाली श्रुत्वा शब्दममर्षणः ।
निष्पपात सह स्त्रीभिस्ताराभिरिव चन्द्रमाः ॥ २८॥

मितं व्यक्ताक्षरपदं तमुवाच स दुन्दुभिम् ।
हरीणामीश्वरो वाली सर्वेषां वनचारिणाम् ॥ २९॥

किमर्थं नगरद्वारमिदं रुद्ध्वा विनर्दसि ।
दुन्दुभे विदितो मेऽसि रक्ष प्राणान्महाबल ॥ ३०॥

तस्य तद्वचनं श्रुत्वा वानरेन्द्रस्य धीमतः ।
उवाच दुन्दुभिर्वाक्यं क्रोधात्संरक्तलोचनः ॥ ३१॥

न त्वं स्त्रीसंनिधौ वीर वचनं वक्तुमर्हसि ।
मम युद्धं प्रयच्छ त्वं ततो ज्ञास्यामि ते बलम् ॥ ३२॥

अथ वा धारयिष्यामि क्रोधमद्य निशामिमाम् ।
गृह्यतामुदयः स्वैरं कामभोगेषु वानर ॥ ३३॥

यो हि मत्तं प्रमत्तं वा सुप्तं वा रहितं भृशम् ।
हन्यात्स भ्रूणहा लोके त्वद्विधं मदमोहितम् ॥ ३४॥

स प्रहस्याब्रवीन्मन्दं क्रोधात्तमसुरोत्तमम् ।
विसृज्य ताः स्त्रियः सर्वास्तारा प्रभिड्तिकास्तदा ॥ ३५॥

मत्तोऽयमिति मा मंस्था यद्यभीतोऽसि संयुगे ।
मदोऽयं सम्प्रहारेऽस्मिन्वीरपानं समर्थ्यताम् ॥ ३६॥

तमेवमुक्त्वा सङ्क्रुद्धो मालामुत्क्षिप्य काञ्चनीम् ।
पित्रा दत्तां महेन्द्रेण युद्धाय व्यवतिष्ठत ॥ ३७॥

विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसंनिभम् ।
वाली व्यापातयां चक्रे ननर्द च महास्वनम् ॥ ३८॥

युद्धे प्राणहरे तस्मिन्निष्पिष्टो दुन्दुभिस्तदा ।
श्रोत्राभ्यामथ रक्तं तु तस्य सुस्राव पात्यतः ।
पपात च महाकायः क्षितौ पञ्चत्वमागतः ॥ ३९॥

तं तोलयित्वा बाहुभ्यां गतसत्त्वमचेतनम् ।
चिक्षेप वेगवान्वाली वेगेनैकेन योजनम् ॥ ४०॥

तस्य वेगप्रविद्धस्य वक्त्रात्क्षतजबिन्दवः ।
प्रपेतुर्मारुतोत्क्षिप्ता मतङ्गस्याश्रमं प्रति ॥ ४१॥

तान्दृष्ट्वा पतितांस्तत्र मुनिः शोणितविप्रुषः ।
उत्ससर्ज महाशापं क्षेप्तारं वालिनं प्रति ।
इह तेनाप्रवेष्टव्यं प्रविष्टस्य बधो भवेत् ॥ ४२॥

स महर्षिं समासाद्य याचते स्म कृताञ्जलिः ॥ ४३॥

ततः शापभयाद्भीत ऋश्यमूकं महागिरिम् ।
प्रवेष्टुं नेच्छति हरिर्द्रष्टुं वापि नरेश्वर ॥ ४४॥

तस्याप्रवेशं ज्ञात्वाहमिदं राम महावनम् ।
विचरामि सहामात्यो विषादेन विवर्जितः ॥ ४५॥

एषोऽस्थिनिचयस्तस्य दुन्दुभेः सम्प्रकाशते ।
वीर्योत्सेकान्निरस्तस्य गिरिकूटनिभो महान् ॥ ४६॥

इमे च विपुलाः सालाः सप्त शाखावलम्बिनः ।
यत्रैकं घटते वाली निष्पत्रयितुमोजसा ॥ ४७॥

एतदस्यासमं वीर्यं मया राम प्रकाशितम् ।
कथं तं वालिनं हन्तुं समरे शक्ष्यसे नृप ॥ ४८॥

यदि भिन्द्याद्भवान्सालानिमांस्त्वेकेषुणा ततः ।
जानीयां त्वां महाबाहो समर्थं वालिनो वधे ॥ ४९॥

तस्य तद्वचनं श्रुत्वा सुग्रीवस्य महात्मनः ।
राघवो दुन्दुभेः कायं पादाङ्गुष्ठेन लीलया ।
तोलयित्वा महाबाहुश्चिक्षेप दशयोजनम् ॥ ५०॥

क्षिप्तं दृष्ट्वा ततः कायं सुग्रीवः पुनरब्रवीत् ।
लक्ष्मणस्याग्रतो राममिदं वचनमर्थवत् ॥ ५१॥

आर्द्रः समांसप्रत्यग्रः क्षिप्तः कायः पुरा सखे ।
लघुः सम्प्रति निर्मांसस्तृणभूतश्च राघव ।
नात्र शक्यं बलं ज्ञातुं तव वा तस्य वाधिकम् ॥ ५२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com